# आचार्यद्वितीयवर्षम्

# प्रथमपत्रम् – प्राचीनन्यायवैशेषिकम्

# शैक्षिकनिष्पत्तिः

**ग्रन्थः -न्यायमञ्जरी**

**अमुं पाठ्यग्रन्थमधीत्य छात्राः**

- पदस्वरूपं, जातिशक्तिवाद-जातिविशिष्टव्यक्तिशक्तिवादयोः परिशीलनं, मतभेदेन अपोहपदार्थनिर्वचनं,परिशीलनं सामान्यस्वलक्षणयोरविरोधत्वं, व्यक्तिव्यतिरिक्तजातिसमर्थनं च विजानीयुः।
- केवलजातिव्यक्त्योः शब्दार्थत्वपरिशीलनं, विशिष्टस्य शब्दार्थत्वव्यवस्थितिं , पदानामर्थोपस्थापकत्वप्रकारम्, उपसर्गाणामर्थबोधकत्वप्रकारं, वाक्यार्थविचारे नानाविधविप्रतिपत्तीनां निरासः, क्रिया-फल-भावनानां वाक्यार्थत्वनिरासप्रकारं चावगन्तुं समर्था भवेयुः।
- विधिस्वरूपं, शाब्दीभावनायाः स्वरूपविभागादीन्, नियोगस्य स्वरूपविभागादीन्, विध्यादीनां प्रवर्तकत्वपरिशीलनं, वाक्यस्वरूपम्, उद्योग-प्रतिभादीनां वाक्यार्थत्वनिरासप्रकारं च ज्ञातुं प्रभवेयुः।
- वैयाकरणमतानुसारेण स्फोटस्य प्रत्यक्षत्वं वर्ण-ध्वन्याद्यभिव्यक्तित्वम् अर्थप्रत्यायकत्वं शब्दब्रह्मस्वरूपत्वञ्च, तत्र न्यायसिद्धान्तं, स्फोटाऽसिद्धिं वर्णानामर्थप्रत्यायकत्वव्यवस्थितिं च विजानीयुः।
- वाक्यार्थबोधसाधनपरिशीलनं, वाक्यार्थबोधे अभिहितान्वयवादनिरासम्, अन्विताभिधानवादसिद्धान्तं, लोके इव वेदेऽपि तात्पर्यशक्त्या अन्वयबोधं, व्याकरणस्य वेदाङ्गत्व-वेदार्थावधारकत्व-शब्दसंस्कारत्वादीनां परिशीलनं चावगच्छेयुः।
- साधुशब्दानां वाचकत्वम्, असाधूनां साधुशब्दतुल्ययोगक्षेमत्वं, शब्दसाधुत्वस्य शास्त्रसहकृतप्रत्यक्षगम्यत्वं, व्याकरणाध्ययनस्यावश्यकताम्, आगमप्रामाण्यसिद्धिं च अधिगन्तुं शक्नुयुः।

*********